# ॥अथाभ्यसनानामुत्तराणि॥

## १

अद्य त्यजन्ति । अधुना चरथ । सदा रक्षामि । नमावः पुनः । क्व धावसि । पचतः । त्यजथ । दहति । अधुना जीवामः । शंसथः । नमथ कुतः । तत्र पतन्ति । कुत्र वसथ ॥

## २

नरः क्षीरं पिबति । गजं नयति नृपः । गृहे पततः । जलं यच्छति देवः । देवौ स्मरथः । ग्रामं जयति नृपः । हे नरा नगरं पश्यामः । फलानि पचन्ति । देवान्नमति नरः । गजौ जीवतः । वर्षन्ति देवाः ॥

## ३

नरान्मार्गं पृच्छति बालः । मेघाः क्षेत्रेषु जलं सिञ्चन्ति । मार्गाभ्यां नगरं गच्छतः । नराभ्यां धनानि यच्छति नृपः । नरस्य पुत्राः कटेषु सीदन्ति । मेघानां जलं यच्छन्ति देवाः । जलेन हस्तौ स्पृशावः । नरौ पुत्रौ गृहं नयतः । नगरस्य मार्गं बालौ दिशतः ॥

## ४

शिवो गिरिषु वसति । अरी कुन्तान्नृपाय क्षिपतः । रामः पाणिभ्यां पुत्रौ स्पृशति । अग्निर्वृक्षान्दहति। ऋषयो वदन्ति सत्यम् । जनानां सत्येन भवति सुखम् । ऋषेः पाणी जलं स्पृशतः । फलानि वृक्षेषु तिष्ठन्ति । जना हरिं स्मरन्ति । हरिर्नरान्दुःखाद्रक्षति ॥

## ५

भानोः पादा गिरीनधुनारोहन्ति । वारिणो बिन्दुर्मेघात्पतति । नृपौ कवीनां स्निह्यतः । वायुर्गिरीणां शिखरेभ्यो वहति । नृपः शत्रुभ्यः कुन्तानस्यति । शिष्यो गुरुं नमति । नरौ पुत्रैरागच्छतः । लुभ्यतो मणीन् । हे ऋषे विष्णुं यजामः । अन्नमग्निना पचतः । ऋषयो विष्णुं सूक्तैः शंसन्ति ॥

## ६

क्षत्रिया धनैर्दीव्यन्ति । अद्य नृपतेरश्वा मार्गे श्राम्यन्ति । अधर्मस्य पादो नृपतिमृच्छति । क्षत्रियः कुन्तेनारिं विध्यति । अलिर्मधु मुखेनाचामति । अलयस्तत्र भ्राम्यन्ति । नरौ मधु फलानि च पचतः । यदा गुरोः कोपः

शाम्यति तदा तुष्यन्ति शिष्याः । क्षत्रियानां नेत्रेष्वश्रूणि तिष्ठन्ति । शत्रवो नृपतिं शरैर्वर्षन्ति ॥

## ७

स्तेना जनानां धनानि चोरयन्ति । बालौ मुखं क्षालयतः । जनकः पुत्रेभ्यः पापस्य दण्डं कथयति । शिष्या गुरुं पूजयन्ति नमन्ति च । फलानि पाणिभ्यामानयथो गणयथश्च । पुण्यं दुःखाद्गोपायति । सूता अश्वान्दण्डैस्ताडयन्ति । कोपान्नृपः स्तेनं कुन्तेन विध्यति ॥

## ८

तत्रोद्धेर्वीचीनां बलेन गृहे कम्पेते। पुत्रस्य मुखं जनक ईक्षते । शिष्याणां कल्याणाय यतामह इति गुरवो भाषन्ते । जनकं बाला अन्नमर्थयन्ते । वने तत्र गजा ऋक्षैर्युध्यन्ते । अत्र शूद्रौ द्विजाभ्यां सेवेते । फलानि बालेभ्यो रोचन्ते । कुतो धनानि लभध्वे । अधुनर्षी यज्ञमारभेते ॥

## ९

शिष्यौ प्रभूतां भिक्षां गृहस्थस्य भार्या भिक्षेते । प्रयागे गङ्गा यमुनया संगच्छते । पापा मनुष्याः३ स्वर्गं न लभन्ते । हे विष्णो शिवो३ऽद्य हरेः कन्यां३ गङ्गां परिणयति । रण इषुभिर्नृपा युध्यन्ते शत्रूंश्च पराजयन्ते । नृपावत्र रथ्यायां कृष्णाभ्यामश्वाभ्यामवरोहतः । विद्ययर्षेः पुत्रौ शोभेते । पापस्य व्याधस्य भयाद्विहगावुड्डयेते । हरेर्भाषां नावगच्छावः । संध्ययोर्ऋषयो देवान्पूजयन्ति । ग्रामस्य रथ्यायां गुरुः शिष्यश्च संगच्छेते । देवान्यजावहे न तु हरये यजावः ॥

## १०

विहगेभ्यो धान्यं कीर्यते । मालाः कन्याभिर्बध्यन्ते । हरिः पुनः स्तूयते । विष्णुणा बाहोर्जलं धीयते । सुखेन छायायां सुप्यत इत्युच्यते मनुष्यैः । ऋषिभ्यामिज्यते । जनकेनाशाः शिशौ धीयन्ते । गुरोराज्ञा शिष्येण हीयते । शिष्याभ्यां शास्त्रं ध्यायते । क्षेत्रेषु धान्यमुप्यते । अक्षैर्दीव्यते । नृपस्याज्ञा विधेयैर्भृत्यैर्गृह्यन्ते । नरेण क्षेत्रे खायते ॥

## ११

नद्याः शीतो वायुर्वहति । यदा नृपतिं शरणमपृच्छत तदानर्थैंऽतिष्ठत । नद्यो३र्गङ्गायां यमुनायां च पूरो वर्तते । नार्यौ रामस्य स्तोत्रमगायताम् । हे ऋषी कुतो देवीर्घृतेन यजथः । देव्या दास्यो मणीन्रत्नानि चानयन् । कोपाद्गुरुर्बाङ्गनाताडयच्छिष्यम् । भृत्यौ घटैर्वाप्या वार्याहरताम् । परशुना

तरुभ्यः काष्ठान्यवाकृन्तत । ऋषिरिन्द्रस्य पत्नीमिन्द्राणीं सूक्तैरशंसत् ॥

## १२

साधूनां भक्त्या विष्णुस्तुष्यति मुक्तिं च यच्छति । बह्वीनां जातीनां मनुष्या नगर्यामवसन् । विहगा भूम्या उड्डयन्ते । बुद्ध्या बलेनानर्थान्पारयामः । गोपो वने धेनूर्गोपायति । बुद्ध्योद्योगेन च बह्वीं कीर्तिं विन्दध्वे । काव्यं कवेः कीर्त्यै कल्पते । भूत्यै शिवं वन्दावहे । रश्मयोऽश्वस्य हन्वोर्बध्यन्ते । रात्र्यां श्रुतिमपठाव ॥

## १३

समुद्रात्क्षीरुदजायत । कुतः कर्णानप्यधीयध्वम् । शूद्रा द्विजातीनां भाषामभाषन्तेति प्रत्यभाष्यत ब्राह्मणैः । धिया कपोतौ जालादमुच्यत । गुरुर्बालौ मेखलाभ्यां समनह्यत् । यदा शिष्यस्य ह्रीर्व्यनश्यत्तदा धर्मोऽत्यक्राम्यत । कुतः श्वेता धेनूरलभध्वम् । कृत्स्ना पृथिवी महाराजेनाध्यष्ठीयत । श्रियै नृपतिं प्रापद्यामहि । स्मृती विष्णुनारच्येताम् । कृष्णाया धेन्वाः क्षीरं शिशुभ्यां धीयते ॥

## १४

इन्द्रान्याः स्तुतिर्वधूभिर्गीयते । श्रुतिं शास्त्राणि चाभ्यस्यत सत्यं वदत गुरून्नमतेति स्मृतीनां शिष्याणामादेशः । रक्षन्तु प्रजा नृपतयः पापांश्च दण्डयन्त्विति धर्मो न हीयते । हे वध्वः श्वश्रूर्नमत । सूतोऽश्वान्मा ताडयतु मा पीडयतु वा । भूषणान्यानयतमित्यादिश्येतां दास्यौ देव्या । जुहूभ्यां जलं वेदिं प्रास्याम । धनैरक्षैर्दीव्यावेति क्षत्रियाभ्यामभाष्यत । अद्य पुत्रावुपनयानीति ब्राह्मणो भाषते । वापीं पुरुषा खनन्तु ॥

## १५

वसिष्ठो विश्वामित्रश्चर्षी बहूनां सूक्तानां द्रष्टारौ । भार्या भर्तुः स्निह्यतु । क्षत्रिया नेतॄननुगच्छन्तु शत्रुभिश्च युध्यन्ताम् । नद्यां३ स्वसृभ्यां बालः संगच्छताम् । लोकः स्रष्ट्रासृज्यत । साधूनां दातॄणां गृहेषु भिक्षा मुनिभ्यो दीयते । भोजः पार्थिवः स्तुतीनां कर्तरि दाताभवत् । भृत्या सदा भर्तॄन्सेवन्ताम् । साधूनां रक्षितॄन्देवानाश्रयध्वम् । धातुः कृपया मनुष्या३ जीवन्ति । हे दातर्दरिद्रैर्नम्यसे । स्वसॄर्नगरीं नयति नरः ॥

## १६

नहपानस्य जामात्रर्षभदत्तेन बहवो गावो ग्रामाश्च प्रभूतं सुवर्णं च ब्राह्मणेभ्योऽदीयन्त । मातुर्भूषणानि स्वसृभ्यो यच्छेः । सूतो घासमश्वेभ्य

आहरेदश्वांश्च न पीडयेत् । वसुनोऽधिको भागो भ्रातृषु ज्येष्ठाय पित्रा दीयताम् । हे शिशवः काष्ठानि जलं च गृहे नित्यमानयेतेति पितुराज्ञा । गावो वने चरेयुः । कृष्णाया गोः क्षीरेण जीवेताम् । रथो गवोर्युग्मेनोह्यते । श्वेताभ्यां गोभ्यामृषिर्मोदते । हरिः शिवश्च स्वसारौ रामस्य दुहितरौ परिणयतः ॥

## १७

ग्रामण्या विश्वपो नृपस्याश्वेभ्यो घास आह्रियेत । सुखानि पश्येत कीर्तिं विन्देध्वम् । नृपतिः क्षत्रियैः सह नावा समुद्रमतरत् । कथयेः कुत्र मित्राणि भ्रातृभिः संगच्छेरन् । उद्याने रमेध्वं फलानां भक्षणं तु विरमेत । विश्वपा दुःखात्क्षीयेथाः । पार्थिवस्य पुत्रावद्य पुरोहितेनोपनीयेयाताम् । पितरावभिनन्देतम् । यद्यनृतं भाषेवहि तदा नृपेण दण्ड्येवहि । धीरैः क्षत्रियैः सह शत्रून्पराजयेयेति नृपतिर्नेष्यते । पुण्यस्य फलं लभेमहि ॥

## १८

मया कटः कार्यते । पुस्तकानि मां दर्शय । ब्राह्मणा नावध्यापयेयुर्याजयेयुश्च । पार्थिवो राज्ये करानकल्पयत् । क्षेत्रं स्वैर्दासैः कर्षयामि । मामाशय चामय च । बालं मदपानाययन् । दूतान्पाटलिपुत्रं प्रास्थापयन्नृपतयः । वृका नः पशूनचोरयन् । नृपः कविं विष्णोः स्तोत्रमपाठयत् । मनोरथैरस्माकं हृदयानि व्यथयामः । शिष्यौ गुरू अभिवादयतः । माता दुहितृभ्यां गीतमगापयत् ॥

## १९

यस्यां कौसल्यायां रामोऽजायत तस्या भर्ता दशरथ उच्यते । तवोद्योगाद्गुरुः प्रीयते । कस्मादेवं वदसि । अस्मदन्य एतद्दुःखं न सहेरन् । आचार्यो नः श्रुतिं स्मृतीश्चाध्यापयति । ये नृपाः स्वाः प्रजा धर्मेण पालयन्ति ते सर्वे पराजयेरन् । एतेषां विश्वेषां वृक्षाणां फलानि स्वादूनि । या भार्याः३ स्वान्भर्तृन्सेवन्ते तासां सर्वासां कीर्तिर्वर्धताम् । एतस्मिन्राज्ये३ पार्थिवस्य दण्डः पापान्भीषयते । फलयोः कतरमिच्छथ । पिता मह्यं सुवर्णमदापयद्गास्तुभ्यं न किंचिदन्यस्मै भ्रात्रे । एतन्न केचित्साधयेयुः ॥

## २०

सहायैर्मरुद्भिः महेन्द्रो वृत्रममारयत् । न कश्चित्सुहृदा विना किमपि कार्यं साधयेत् । सर्वासु रथ्यासु छायायै तरवो रोप्यन्ताम् । ये सुहृद आपदि भक्तास्ते जगत्सु दुर्लभाः । द्विजातीनां मेखलोपवीतं च त्रिवृती क्रियेयाताम् । एतां दृषदमग्नेः पश्चात्स्थापय । समुद्रः सरितां भर्ता कविभिरुच्यते ।

भूभृद्भिः प्रजाः पाल्येरन् । एतेषां ब्राह्मणानामेक उपनिषत्स्वन्ये स्मृतिषु कुशलाः ॥

## २१

स्वाध्याये परिव्राड्वाचमुत्सृजेत् । य ऋत्विक्षुर्चः पठति स होतोच्यते । स्नातकः स्रजमुपानहौ छत्त्रं च धारयेत् । मम द्विट्सु रामो बलिष्ठ इति रावणोऽवदत् । विश्वस्यां पृथिव्यां सम्राट्सामन्तान्दमयेद्विशश्च पालयेत् । ऋक्षूष्णिग्दृश्यते । वृद्धस्य दृङ्भ्यपतत् । मित्रध्रुक्षु विभीषणो गण्यते । ऋषिरिन्द्राणीमृग्भिः शंसति । सम्राडसिना द्विड्भ्यः प्राहरत् । युद्धे कृष्णो३ऽरिभिरमार्यत । ऋग्भिर्नौ द्विषो द्रुह्यन्तामिति कोपाद्ब्राह्मणोऽभाषत ॥

## २२

हरेः कीर्त्यै गिरमुत्सृजत । भरतखण्डस्य पूर्षु धनिनो वणिजस्तेजस्विनश्च क्षत्रिया निवसन्ति । पुरूरवसो यशः कालिदासेनागीयत । क्षितिपः स्वान्मन्त्रिणोऽह्वाययत् । तपस्विनां मनांसि वसुनि न सजेयुः । रात्रौ चन्द्रमा ज्योतिषं प्राणिभ्यो यच्छति । सुमनोभिः फलैः पयसा च न प्राणिभिर्देवान्यजेत् । अप्सरसो रणे मृतान्क्षत्रियान्स्वर्गं नयन्ति । वयसा न विद्यया शिवो भ्रातॄणां प्रथमः । हविषा देवा वर्तन्ते । श्रियं वणिगिच्छति यशः क्षत्रियो मुक्तिं च तपस्वी । वाष्पैर्योषितां चक्षूंषि रुद्धानि ॥

## २३

अश्वांस्ताडयन्तं सूतं निन्दामः । क्षितिपः पापान्दण्डयन्सद्भ्यश्चान्नं ददच्छस्यते । युद्धे जयन्क्षत्रियो महतीं कीर्तिं विन्दते । आदित्यश्चन्द्रमाश्च ज्योतिःषु महान्तौ । क्षेत्रे पततो विहगानैक्षे । जीवन्नद्य श्वो मृतः । सतां वाक्समाचर्येत । सत्सु वसत । स्रजः सृजती कन्या दृषदि सीदति । भर्ता तस्य वसु चोरयन्तीं भार्यां दण्डयेत् । गृहे भ्राम्यद्भ्यो मधुलिड्भ्यः शिशोर्भयं भवति ॥

## २४

ब्राह्मणा उपानहश्चर्मणा तक्ष्णा वा कारयन्ति । एतस्य ग्रामस्य सीम्नि सरितस्तीरे भगवतो विष्णोर्देवकुलं तिष्ठति । पात्राणि भस्मभिः सम्यङ्मार्जयतु । उभौ श्रीमन्तौ कवी आगच्छेतामिति राज्ञे भृत्या न्यवेदयन् । हे शिशू आत्मनोर्नाम्नी मां श्रावयेतम् । ब्रह्म बह्वीषूपनिषत्सु वर्ण्यते । ब्रह्म विभ्विव१त्यृषिभिरुच्यते । यो ब्रह्मणो भागः शरीरेऽवाक्छिद्यत स मनुष्यस्यात्मोच्यते । चन्द्रगुप्तो विश्वस्या भुवो महान्राजाभवत् । ये बलवन्तः क्षत्रियाः कृष्णस्य सेनायामयुध्यन्त ते सर्वे रणे हताः । ऋक्षु त्रिष्टुब्दृश्यते ।

पाटलिपुत्रस्य राजा जन्मना शूद्रः ॥

## २५

मघोना मरुद्भिः सह वृत्रोऽघात्यत । युवत्यो गीतमगायन् । विद्वांसौ ब्राह्मणौ विवदेते । सरमर्त्तु देवानां शुन्युच्यते । प्रतीच्यां दिशि महान्ति वनानि विद्यन्ते । परिषदि विदुषां श्रेयांसो धर्ममुपदिशेयुः । ये पापानि कर्माण्याचरंस्तेऽहस्तिष्ठेयू रात्रिं च सीदेयुः । यूना क्षत्रियेण यशोऽलभ्यत । प्राग्देवान्नमेत्प्राग्देवानां देशः । अहन्यहनि सूर्यं पूजयेत् । हरिणः श्वभिरमार्यत ।सिंहो वनवासिनां तिरश्चां राजा ॥

## २६

पथि पुंसां स्त्रीणां च समागमोऽजायत । सूर्यौ वेदे पूषा मित्रोऽर्यमा सविता चोद्यते । ऋक्षु च यजुष्षु चापो देवतासु गण्यते । हे शिव शिवो भव द्विपदे चतुष्पदे च । अप्स्व१ग्निस्तिष्ठतीत्यृषीणां मतिः । मघोना दधीचो३ऽस्थ्नासुरोऽहन्यत । केन वायोः पन्था ज्ञायते । अम्ब दध्ना शिशूंस्तर्पय । अस्माकं सख्युर्गृहादन्नं भारयत । मरुतो मघोनः सखायः ॥

## २७

औषधमेभ्यो रुग्णेभ्यस्तूर्णं धारयत । यस्मिन्गिरौ शिवो वसत्ययं कैलासः । पुरोहितोऽस्यामुष्य च लोकयोर्लाभाय मामयाजयत् । आसां स्त्रीणां स्रक्षु सुमनसो म्लानाः । यो राजास्माभिः स्तुतिषु शस्यमानोऽमुना वयमेभिर्मणिभिर्मुदिताः । वैश्यः स्वौ प्यानावनड्वाहौ हलेनायोजयत् । विद्वान्ब्राह्मणो३ऽह्न उत्तीर्णः । असावागच्छति राज्ञी । मुक्तानां हारो३ऽस्य राक्षसस्य कण्ठे लग्नः । किं पापं क्षीणा जना न चरन्ति । इदमुद्यानं पुम्भिः स्त्रीभिश्च पूर्णम् ।।

## २८

सैनिकानां बहवो मारिताः कतिपयेऽवशिष्टाः पुरं पलायिताः । पुरो द्वारो दृढं पिहिताः पौरा युद्धाय संनद्धाः । यवना आक्रान्तवन्तः पुरं चोपरुद्धवन्तः । बह्न्यहानि युद्धं प्रवृत्तम् । अन्ते यवना जितवन्तो बलेन च पुरि प्रविष्टाः । युवानो वृद्धाश्च पुमांसो भूयो हताः स्त्रियश्च दास्यः कृताः पौराणां महान्तो रायो मुषिताः प्रासादा गृहाणि चाग्निना दग्धानि । पृथ्वीराजस्यान्तो यवनैर्वर्णितो३ऽस्य च पूर्वं चरितं कविना चण्डेन गीतम् ॥

## २९

प्रतीचां देशानां सामन्तान्विजित्य नृपतिः प्रति प्राचान्प्रचलितः ।

धनेनादाय मुदिता वणिजो मणीन्राज्ञे दत्तवन्तः । संध्ययोर्देवान्पूजयित्वा समिधश्च हुतभुजि समाधाय वार्वाप्या आहरेत्युक्त्वा गुरुः कट उपविष्टः । शत्रुभिः सह युद्ध्वा शूरेण तेषां जयेन महद्यशो वित्तम् । स्वांस्त्यक्त्वा ब्राह्मणः प्रव्रजितः । आत्मनोऽभिप्रायं भृत्ये निवेद्य वणिक्तं ग्रामं प्रस्थापितवान् । धनान्यानाय्य गृहस्थ इमानि दरिद्रेषु विभक्तवान् । उभयोः पक्षयोर्वाचावश्रुत्वा राजानो व्यवहारान्न निर्णयेयुः । बलवतो द्विषोऽवमत्य जयाय च साधनान्यचिन्तयित्वा तैः सह युध्यमानो नश्यति । वेदाननधीत्य प्रव्रजन्मुक्तिमनाप्त्वा नरके च्यवते ॥

## ३०

ब्रह्मचारी नृत्तं द्रष्टुं गीतं वा श्रोतुं समाजेषु न प्रवेष्टव्यः । कर्माण्यन्यस्मिञ्जीविते फलवन्तीति मत्वा विहितं समाचरितुं यतनीयम् । स्रजो बन्द्धुमुद्याने कन्या निषण्णाः । भक्ताः सखायो दुर्दशायास्तरीतुं समर्थाः । पितृभ्यां प्रणन्तुं दुहितर आगताः । कथमस्याः सुन्दर्यास्तरुणेन वपुषा तपांसि सोढुं शक्यते । भवता पण्डितेन भवितव्यम् । सरितं तरितुं नावमानाययितुमर्हसि । को बलवन्तं वायुं रोद्धुं प्रभवन् । भवन्त इदं पत्त्रं वाचयितुमर्हन्ति । वेदं समाप्य स अन्यानि शास्त्राण्यध्येतुं प्रवर्तितवान् ॥

## ३१

अश्विनो रथस्त्रिभिश्चक्रैर्युक्तः । ऋषिणाश्विनौ चतसृभिर्ऋग्भिः शस्यमानौ । षण्णां भ्रातॄणां कृष्णो ज्येष्ठः पञ्चानां पाण्डवानामर्जुनस्तृतीयः । अष्टौ विवाहा इत्येके षडित्यन्ये मन्यन्ते । सप्तविंशतिरष्टाविंशतिर्वा नक्षत्राणि ज्योतिषे स्मर्यमानानि । अष्टमे वर्षे ब्राह्मणमुपनयेदेकादशे क्षत्रियं द्वादशे वैश्यम् । द्वे महती ज्योतिषी दिवि राजमाने । पञ्चमीमृचमध्याप्याचार्यः षष्ठीमुक्तवान् । बुद्धः शाक्यमुनिरशीते जीवितस्य वर्षे मृतः । क्वचित्त्रयस्त्रिंशत्क्वचित्त्रीणि सहस्राणि त्रीणि शतान्यूनचत्वारिंशच्च देवा वेदेषु संकल्प्यन्ते ॥

## ३२

तिसृणां दशरथस्य भार्याणां कौसल्या कैकेय्याः सुमित्रायाश्च ज्यायसी गरीयसी चाभवत् । हेमन्ते रात्रयो द्राघिष्ठाः । भुवी३दृशानि भूषणानि न भूयांसि विद्यन्ते । आमिषूदीच्या नृपेषु पृथ्वीराजो बलवत्तमः । कालिदासस्य काव्यानि बाणस्य ग्रन्थेभ्यः स्वादुतराणि । अनाथपिण्डिको राजगृहस्य वणिक्षु धनितमोऽभवत् । लोहं सुवर्णाल्लघुतरं वृक्षाच्च गुरुतरम् । धावनेऽश्वश्चतुष्पदामाशिष्ठः । शकुन्तला सर्वास्वन्यासु तस्य कालस्य स्त्रिषु सुन्दरतमाभवन्महिष्ठेन च जगतः संराजा परिणीता । वायसः पक्षिणां पटिष्ठ उच्यते ॥

## ३३

दिव्यश्रिया राजमानामतिमानुषीमिव तां दृष्ट्वा राजर्षेर्मनोऽमुष्यामनुरक्तम् । इमामप्सरोदुहितरमवगत्य स क्षत्रियानुरूपगन्धर्वविवाहेनैनां पर्यणयत् । भूयांस्यहोरात्राण्याश्रम उषित्वा शकुन्तलां त्यक्त्वा दुष्यन्तः स्वनगरं निवृत्तः । तदा तीर्थयात्रां समाप्याश्रमं प्रत्यागत्य दुहितृविवाहवृत्तान्तं च विदित्वा कण्वो दुष्यन्तसमीपं प्रेषितः । राजर्षिस्तु नगरगतां शकुन्तलां पूर्वं प्रत्याख्याय पश्चादग्रमहिषीपदे नियुक्तवान् । गतकालेन तस्यां सुकुमारो भरतो नामाजायत ॥

## ३४

कृतपापा द्वादशाहं षडहं त्र्यहं वा प्रायश्चित्तानि समाचरेयुः । इन्द्रसखः पुरूरवा इन्दुमुखीमनवद्याङ्गीमुर्वशीमप्सरसं पर्यणयत् । नर्मदायां भृगुकच्छं वर्तते । तत्र दीर्घबाहुः पृथुवक्षा असिपाणिरङ्गराजस्तिष्ठति । ज्ञानमार्गः कर्ममार्गाच्छ्रेयान् । मृतभर्तृका यथेच्छं द्वितीयं वरयत इति पुराणप्रोक्तम् । कामदेवोऽनङ्गो मीनकेतुश्चेति कवयो वदन्ति । सीतानामा ब्राह्मणदुहिता पद्माक्षी । बहुभार्योऽपि राजापुत्रः । शिष्यान्वितो वाक्पटुः पण्डित आगतः । उन्मुखश्चातको मेघोदकमर्थयते ॥

## ३५

भगवतो विष्णोर्देवकुले प्रविश्य वयं मनोहरश्रुति युवतिजनानां गीतमशृण्म । इदं स्निग्धमित्रस्य शब्दं शृणुत । लुब्धा नित्यं धनानि संचिन्वाना नकदाचित्तद्भोगमश्नुवते । सुरचितै रसवत्काव्यैर्दशदिक्षु कीर्तिमाप्तुं शक्नुथ । हे शकुन्तले सदृशं भर्तारमाप्नुतात् । मद्भ्रातरौ काशीं प्रस्थातुं निरचिनुताम् । शत्रुभार्याहृदयानि राजासिर्दुनुयात् । मेघा दिवं वृण्वते । द्वाःस्थो द्वारं संवृणोतु ॥

## ३६

अग्निहोत्री चातुर्मास्यानि वर्षे वर्षे तनुयात् । सुहृदामुपकुर्वन्द्विषां चापकुर्वन्महाराज स्वराज्यं रक्षतात् । ब्राह्मणा लवणव्यवहारं तिरस्कुर्वन्ति । यत्त्वमकुरुथास्तदधुनापि त्वत्सखीन्दुनोति । यो मामुपकरोति तं प्रतिकुर्याम् । महाराजानुज्ञया चतुरः कुमारान्यथाविध्युपनय । चौलुक्या द्वे शते सप्तचत्वारिंशच्च वर्षाण्यनहिलपाटके राज्यकुर्वन् । मुखकान्त्या कमलाक्षी चन्द्रमसमपि संवृणोति । यदि स शिष्यंमुपनयत्यध्यापयति साधूकरोत्यसौ तत्प्रजीभवति । कलिङ्गराजः स्वशत्रुमुरसि शरेणाक्षणोत् ॥

## ३७

अधुना मां निर्यातुमनुजानीहि । एतान्मया तुभ्यं दत्तान्मणीन्गृहाण । महाकविः शब्दरत्नैः काव्यमालां ग्रथ्नीयात् । अहन्यहनि चोरौ राजकोषममुष्णीताम् । दानानि सर्वेभ्यः प्रतिगृह्णानो दुष्यति । एकः स्रष्टा लोकं स्वेच्छया निरमात् । मोक्षाय देवशरणं याहि । राजानः पापान्दण्डेन निगृह्णीयुः । रामस्य दुहितॄर्गृहान्निर्यातीरपश्याम । वरो३ऽग्नेः समक्षं कन्याया हस्तं गृह्णीत । आर्यः परोच्छिष्टं माश्नातु । दिनेदिनेऽनिरुद्धे जले स्नातव्यम् । त्र्यक्षः कलाललाटो महेश्वरो युष्मान्पायात् ॥

## ३८

तिस्रो दशरथभार्याश्चतुरः पुत्रान्प्रासुवत । सीतान्वितौ रामलक्ष्मणौ वनमपेताम् । मृतभर्तृकाः षण्मासानधः शयीरन् । साक्षी दृष्टश्रुतादन्यं विब्रुवन्दण्डनीयः । कृतप्रायश्चित्तं सर्वपापान्यपयन्ति । अपयन्नस्तंयन्वा सूर्यो न द्रष्टव्यः । कुतस्त्वं सभार्यापुत्रो मद्गृहमभ्यैः । वरुणं स्तुवीहीति यूपबद्धं शुनःशेपं देवा अब्रुवन् । सदा सत्यं ब्रूहि । अराजके देशे वसुमन्तो न शेरते सुखम् ॥

## ३९

व्याकरणशास्त्रं व्याचक्षाणस्य पण्डितस्य शब्दाञ्छृणु । चरमायां यामायां ब्राह्मणा जाग्रतु पुण्यार्थं च किंचित्कुर्वन्तु । त्रिलोक्यां विश्रुतं दशरथपुत्रं रामं लङ्केश्वरस्य रावणस्य जेतारं विद्धि । त्रिर्जलमाचम्य द्विरोष्ठौ परिमृजन्तीत्येके सकृदित्यन्ये । योद्धारौ तत्सखीन्हतवन्तमङ्गराजं स्वशरैरहताम् । वधोद्यतं गुरुमप्यशङ्कया जहि । कुतत्वं श्रुतवृत्ते ज्ञात्वा मां शूद्रं वेत्थ । पाण्डुपुत्रान्मा द्विड्ढि । विपन्नपुत्रा जाया भूयो विलप्य चक्षुर्भ्योऽश्रूणि प्रामार्जन् । हे ईश्वर त्वमीशिषे द्विपदां चतुष्पदां च ॥

## ४०

यथाधर्मं महाराजश्चिरं शास्तु पृथिवीं । आसीद्राजा नलो नाम वीरसेनसुतो बली । हतहरिणरुधिरतृप्तः सिंहो जिह्वया मुखं लेढि । रात्रौ कुत्र त्वमस्वपीरिति गृहस्थोऽतिथिं वक्तु । गोपा धेनूर्दिने दिने द्विरधोक् । पितृताडितो बालोऽरोदद्भृशम् । ऋषिर्देवान्सूक्तैरैट्ट । कस्य पुत्री त्वमसि बाले । येन त्वं प्राणिषि सर्वं चेदं जगत्प्राणिति तं परमात्मानं विद्धि । प्रातरुत्थाय सवितारमुपाध्वम् । रामं चेन्नेडीथा मुक्तिस्तुभ्यं न स्यात् ॥

## ४१

अध्वर्यव आहुतीरग्नौ जुह्वतु । ऋषयश्चत्वारिंशत्संस्कारान्स्मृतिषु विदधति । दशरथः स्वपुत्रानन्तेवासि वसिष्ठाय प्राददात् । स्वसो मा बिभेत्विति वने स्त्रिया संगच्छन्ब्रूयात् । स्नातकः स्रजं छत्त्रोपानहं च बिभर्तु । परक्षेत्रान्मूलफलधान्यमाददानो दण्डनीयः । द्वास्स्थौ द्वारमपिधत्ताम् । दासो गृहागतस्यातिथेः पादौ नेनेक्तु । गुरोः शासनानि मा जहीहि । प्रभूतभूषणानि बिभ्रद्राजर्षिर्महाद्युत्या सूर्य इव व्यभात् । अनधीतपाठाः शिष्याः गुरोर्जिह्रियति ॥

## ४२

यवनाः साकेतमरुन्धन् । गिरिनगरं चिरकालं रुद्ध्वा जयसिंहस्तमन्तेऽभनक् । परिव्राण्मासेन द्वे शते चत्वारिंशतं च ग्रासानेव भुञ्ज्यात् । अग्निमिन्त्स्व शाखाश्च समिदर्थं छिन्द्धि । गा दुग्धि धान्यं च पिण्ड्ढीत्येकः पुरोहित इतरस्मै प्रातरब्रवीत् । गुरुः शिष्यान्पुस्तकलेखनाय न्ययुङ्क्त । उच्छ्रितैः शिखरैर्हिमवान्मेघगतिं रुणद्धि । कर्मफलानि भुञ्जानाः पुण्यकृतः स्वर्गे मोदन्ते । परराष्ट्रं जित्वा राजा राजवंशं नोच्छिन्द्यात् । आर्या विवाहकाले गृह्याग्निमिन्धीरन् । स्त्रियस्तण्डुलं मुसलैस्तृंहन्ति ॥

---

Ответы к Бюлеру (2/2)
к.ф.н. М.Ю. Гасунс
http://samskrtam.ru

Редакция 2005 г., г. Минск
(сгенерирован из .txt 13.03.2015)
http://groups.google.com/group/nagari/